International Journal of Multidisciplinary Horizon

ISSN: **3049-2017**
IJMH 2026; 3(2): 289-291
© 2026 IJMH
www.themultijournal.com
Received: 26-03-2026
Accepted: 17-04-2026
Publish : 18-04-2026

**डा० एस्. सूर्यनारायणमूर्ति**
सहायकप्राध्यापकः
(कृष्णयजुर्वेदविभागः),
श्रीवेङ्कटेश्वरवैदिकविश्वविद्यालयः,
तिरुपतिः

**Correspondence:**
**डा० एस्. सूर्यनारायणमूर्ति**
सहायकप्राध्यापकः
(कृष्णयजुर्वेदविभागः),
श्रीवेङ्कटेश्वरवैदिकविश्वविद्यालयः,
तिरुपतिः

# भारतीयवैदिकमातृकाः – एकं परिशीलनम्

**डा० एस्. सूर्यनारायणमूर्ति**

**सारांशः-**

भारतमिदं प्राचीनकालादारभ्य ऋषिपरम्परया संस्कृतिसम्पन्नं देशमस्ति। अत्र वेदवेदाङ्गादिशास्त्र-रूपेण यज्ज्ञानं प्रवर्तते, तत्मातृकास्वरूपेण संरक्षितमस्ति। मातृकाः भारतीयसंस्कृतेः मूलाधाररूपेण प्रतिष्ठिताः सन्ति। अस्मिन् शोधलेखे मातृकाणां स्वरूपं, तेषां भेदाः, उपयोगिता, संरक्षणपद्धतिश्च सम्यक् विविच्यते।

**मुख्य शब्दाः-**

मातृकाः, वैदिकवाङ्मयम् ,भारतीयसंस्कृतिः, हस्तलिखितग्रन्थाः, प्रतिलिपिकरणम्, लिप्यन्त-रणम्,ताल-पत्रम्, भूर्जपत्रम्, लोहपत्रम्, शिलालेखाः, मृत्तिकाफलकम्, कागजपत्रम्, संरक्षणपद्धतिः, ग्रन्थसंरक्षणम् ।

**प्रस्तावना -**

भारतोऽयं आर्षभूमिः कर्मभूमिः धर्मभूमिरिति सङ्कीर्त्यते । अस्मिन् देशे विविधाः संस्कृतयः, सम्प्रदायाश्च विराजन्ते। तेषामाधारभूतस्य वैदिकवाङ्मयस्य प्रचाराय परिरक्षणाय च ग्रन्थरुपेण निर्माय प्राचीनाः निक्षिप्तवन्तः । ग्रन्थानामारचनं तस्मिन्काले मातृकासु कृतं दृश्यते। तासु मातृकासु संस्कृतभाषायां वैज्ञानिक, सांस्कृतिक, कला, आरोग्य, गणित, आगम, धर्मशास्त्र, वेदान्तादि विषयाः उपलभ्यन्ते। एते विषयाः भारतीयसंस्कृतेः आधारभूताः इत्युक्तौ नास्ति सन्देहः । अतः ताः मातृकाः अपि संस्कृतिरक्षणे अत्यन्तं पात्रतां वहन्तीति ज्ञायते।

**मातृकाग्रन्थानां वैशिष्ट्यम्-**

विषयरक्षणैकाशीलाः प्राचीनाः स्वविषयकप्रस्तुतिमनादृत्य ग्रन्थरचनां कृतवन्तः इत्यतः तेषां ग्रन्थानां लेखनेतिहासः नोपलभ्यते। ऐतिहासिककाले ये मातृकाः लब्धाः तासां रचनाकालनिर्णयः, रचयितृ निर्णयश्च कर्तुम् अशक्यमध्यवसितम् । एवञ्च केषाञ्चन ग्रन्थानां सर्वात्मना उपलब्धिरपि कष्टसाध्यमापतितम्। अतः ऐतिहासिककाले विद्वांसः मातृकाग्रन्थेषु यन्निक्षिप्तं विज्ञानं तस्य रक्षार्थं प्रतिलिपिकरणं कर्तुमुद्युक्ता सन्तः विविधेषु पत्रेषु, प्रतिलिपिकरणं, शारदा-ब्राह्मीत्यादिभिः लिप्यन्त-रीकरणं च कृतवन्तः । तत्तप्रदेशस्य शैत्य, बातातपादि स्थितिभ्यः तेषां पत्राणां भेदनिरूपणं, तेषां संरक्षणाय अनुसर्तव्यानां नियमानमवलोकनञ्चास्य व्यासस्य मुख्यविषयः। आधुनिककाले यन्त्रसहायेन ग्रन्थानां प्रतिलिपिकरणं कुर्वन्ति। किन्तु प्राचीनकाले ईदृशः अवकाशः नासीत् । अतः हस्तलेखनद्वारा प्रतिलिपिकरणमकुर्वन्। किन्तु प्रतिलिपि-प्रक्रियायाम् आदर्शप्रति अपेक्षया केचन दोषाः प्रतिलिपिस-ञ्जाताः इति तेषां परिशीलनेन ज्ञायते । प्रतिलिपिकरणार्थं उपयुक्ताः मातृकाः बहुप्रकाराः श्रूयन्ते।

यथा योगिनीतन्त्रे-

**भूर्जौ वा तेजपत्रौ वा तथा वा तालपत्रकौ।**
**विना गुरुश्च देवेशि पुस्तके कारयेत् प्रिये।।**
**सम्भवे स्वरपत्रे च ताम्रपत्रे च शङ्करी।।**
**अन्यवृक्ष त्वची देवी कखा केतकी पत्रके।**
**मृत्ताम्रपत्ररौत्या वा वटपत्रवरानने ।**
**अन्यपत्रे वा सुद्दले लिलेख यः लमभ्यसे।। इति (योगिनीतन्त्रे )**

एतानि च वचनानि योगिनीतन्त्रे उपलभ्यन्ते। एतदनुसृत्य लेखनार्थमुपयुक्ताः मातृकाः ।

**मातृकाणां प्रकाराः-**

यथाः-

1. तालपत्रम् (palm leev)
2. भूर्जपत्रम (Birch bark)
3. कार्पासपट: (Cotton cloth)
4. काष्ठफलकम् (wooded planet)
5. लोहपत्रम् (corps geld and septum plates)
6. शिलाफलकम् (stone plate)
7. मृत्तिका फलकम् ( Brick plate)
8. कागजपत्रम् (paper) इत्यादिरूपेण अष्टविधान इति ज्ञायते ।

**1. तालपत्रम्**

अस्माकं देशे श्रीतालं, करतालमिति द्विविधं तालपत्रमुपलभ्यते। विस्तृतं यत्तालपत्रं गोधुमवर्णे उपलक्ष्यमानं तत् श्रीतालमिति नाम। यच्च तालपत्रं दीर्घं, मन्दं, तीक्ष्णश्च भवति, एवं पीतवर्णं भवति तत् करतालमिति नाम । इयश्च तालपत्रमातृका दक्षिणभारते बहुशः उपलभ्यते । बहवो ग्रन्थाः एतेषु तालपत्रेष्वेव आरचिताः उपलभ्यन्ते।

**2. भूर्जपत्रम्**

"भूर्जे उर्मि मृदुत्वचौ" इति अमरकोशोक्तिः। तस्मात् पूर्वमेव भूर्जपत्रविनियोगोऽस्तीति ज्ञायते। "चीरमिति कविता स्थूला च वृक्षत्वक। वल्कलमं च तव्दिपरीतम तथा भूर्जत्वक्" (अभिनवभारती 21.141) इति वाक्यात् भूर्जवृक्षात् भूर्जपत्रं लभ्यते तच्च तव्दृक्षस्य त्वक् स्वीकृत्य पत्ररुपेण कर्तयित्वा लेखनार्थम् उपयुज्यत इति ज्ञायते। एवञ्च तत् पत्र अत्यन्तं मृदु, स्थूलश्च भवति। उत्तरभारते कश्मीरप्रान्ते च इदं पत्रमुपलभ्यन्ते। तत्र निर्मिताया: "संयुक्तागम" ग्रन्थस्य भूर्जपत्रमातृकाः अफघानिस्थानप्रान्ते उपलब्धिः अस्ति । महाभारतस्य आदिपर्व भूर्जपत्रमातृकासु केचन मातृकाः पुणेस्थ भण्डारकर प्राच्यशोधसंस्थायां संरक्षितं दृश्यते।

**3. कार्पासपटः**

कार्पासपट: आभाषायां cotton cloth इत्युच्यते। "पटे वा ताम्रपत्रे वा स्वमुद्रोपचिह्नितम्" इति याज्ञवल्क्यस्मृतिवाक्येन पूर्वस्मिन्काले पटे लेखनम् आसीदिति ज्ञायते। बाणस्य कादम्बर्यां, हर्षचरिते च कार्पासपटस्य प्रस्तावना अस्ति। अयञ्च अत्यन्तमृदुतम: भवति। अत एवं ग्रन्थरचनां कर्तुमशक्यं भवति । कानिचन आख्यानान्येव कार्पासपटेषु उपलभ्यन्ते।

**4. काष्ठफलकम्**

पूर्वस्मिन् काले लेखनकार्ये काष्ठफलकस्यापि महत्त्वपूर्णः उपयोगः आसीत्। सुदृढत्वात्, सुलभोपलब्धित्वाच्च काष्ठं लेखनाधाररूपेण स्वीक्रियते स्म। विशेषतः यदा त्वरितेन लेखनस्य आवश्यकता भवति, तदा काष्ठफलकमत्यन्तोपयोगी साधनम् आसीत्। अस्योप-योगः प्रायः **तात्कालिकविषय-लेखनार्थम्,** शिक्षणप्रक्रियायां अभ्यासार्थम्, लेखनाभ्यासे तथा गणनादिषु क्रियासु च भवति स्म। काष्ठफलकस्य उपरि मृदुकरणार्थं कदाचित् लेपः (मृत्तिका, चूर्णादि वा) कृत्वा तत्र लेखनं सुकरं क्रियते स्म, अथवा खड्गलेखन विधिना अपि अक्षराणि उत्कीर्णानि भवन्ति स्म। अस्य स्थैर्यं दीर्घकालपर्यन्तं न भवति, अतः स्थायीग्रन्थरचनायां न तावत् व्यापकः प्रयोगः दृश्यते, किन्तु शिक्षणोपयोगे, कार्यालयीनलेखने, तात्कालिकसूचना-प्रदर्शने च काष्ठफलकस्य विशेषः महत्त्वपूर्णः आसीत्।

**5.लोहपत्रम्**

सुवर्ण - रजत- ताम्र-लोहपत्ररूपेण निर्माणं कृत्वा तेषामुपरि लिखन्ति स्म। एतेषां ताम्रपट:, ताम्रपट्टिका, शासनपत्र, पत्रफलक दानपत्रमति नामान्तराणि विद्यन्ते। द्वादशशताब्दौ एतेषां विनियोगः बहुशः आसीत्। 6.5 cm कि आरभ्य 76.5X30 cm पर्यन्तं परिभाषणेषु लोहपत्राणि लभ्यते इति आन्ध्रसाहित्ये प्रसिद्धस्य वाग्गेयकारस्य ताल्लपाक अन्नमाचार्यस्य रचनानि ताम्रपत्रेषु संरक्षितानि उपलभ्यन्ते ।

**6.शिलाफलकम्**

शिलासु ये लेखा: उपलभ्यन्ते ते शिलफलकशब्देन व्यवह्रियते। एतानि च बहुशः शासनलेखनार्थं उपयुक्तानि आसन्। तेषां परिशील-नेन ज्ञायते ते यत् अशोकस्य कालादेव एतानि शिलाफलकानि उपयुज्यन्त इति। हरप्पा, मोहंजुदार काले निर्मितानि शिलाशास-नानि उपलब्धानि।

**7. मृत्तिकाफलकम्**

आर्द्रया मृत्तिकया फलकानि निर्मितानि अपि लेखनार्थं उपयुज्यन्ति स्म। भारतदेशे मृत्तिकाफलकानां विनियोगः बहुशः आसीत्। तेषां विनियोगश्च CBC काले आसीत्। उत्तरप्रदेशराज्ये मधुरायां पुरातन वस्तुप्रदर्शनशालायां कानिचन मृतिकाफलकानि सन्ति।

**8. कागजपत्रम्**

एतेषां विनियोग: - 105 A. D काले मोघलचक्रवर्तिनां परिपालने चैनादेशात् स्वीकृत्य प्रारब्धमासीत् | T. sai इति नामका पण्डिताः अस्य परिचयं कृतवन्तः इदं च पत्रम् काकल, काकलि पत्रम् इति नामान्तरे व्यवह्रियते। "धर्माभ्युदय" इति जैनग्रन्थः जैनभाण्डागारे निक्षिप्ता अस्ति। नन्दिनागरि लिप्यां लिखितं भागवतपुराणे ब्रिटीष् पुरातनवस्तुप्रदर्शनशालायां अस्ति। 5×3.8 CM परिमाणे

विद्यमाना भगवद्गीता मातृका तन्जवूरू प्रान्ते सरस्वती महलमध्ये अस्ति । एते सर्वे कागजपत्रेषु उपलभ्यन्ते । एवमेव अभिज्ञानशकुन्तलनाटके नलिनीपत्रस्य प्रस्तावना दृश्यते। नैषधीयचरिते केतकीपत्रस्य प्रस्तावना विद्यते।

**आधुनिकदृष्टिः-**

अद्यतनकाले मातृकाणां संरक्षणे बहवः आधुनिकोपायाः प्रवर्तन्ते। विशेषतः **डिजिटलीकरणम्** नामकप्रक्रियया प्राचीनमातृकाः उच्चगुणवत्तायुक्तचित्ररूपेण संगणकयन्त्रेषु सुरक्षिताः क्रियन्ते, येन तासां दीर्घकालपर्यन्तं संरक्षणं सुनिश्चितं भवति तथा च वैश्विकस्तरे विद्वद्भिः सुलभतया अवलोकनं शक्यते। तदनन्तरं सम्यग् **प्रकाशनप्रक्रिया** अपि प्रवर्तते, यस्यां समीक्षात्मकसम्पादनम्, पाठभेदसंग्रहः, व्याख्यालेखनं च क्रियते। एवं च **वैज्ञानिकसंरक्षणपद्धतयः** यथा तापमाननियन्त्रणम्, आर्द्रतासंरक्षणम्, रसायनद्रव्योपयोगः, कीटनाशनक्रिया च अनुसृत्य मातृकाणां भौतिकरक्षणम् अपि क्रियते। एतेषां समस्तोपायानां साहाय्येन प्राचीनज्ञानपरम्परा सुरक्षितरूपेण भावीपीढ्यै सम्प्रेष्यते इति निःसंशयम्।

**उपसंहारः -**

वेदवेदाङ्गलक्षणपुराणेतिहास अनेकाःमातृकाः श्रीवेङ्कटेश्वरवेदविश्वविद्यालये, जातियसंस्कृतविश्वविद्यालये, तथैव बहुषु संस्कृतविश्वविद्यालयेषु उपलभ्यन्ते। भारतदेशे तत्र तत्र मातृकालयाः सन्ति। तेषु मातृकापरिरक्षणं भवति। यथा- सरस्वतीमहल्, तन्जावूर्, GOML, चेन्नै, इत्यादयः। एवं च एताः मातृकाः शिवलिङ्गरुद्राक्षखड्गचक्रादि आकृतिषु उपलभ्यन्ते च ।

एतादृशानां संस्कृतिसंरक्षणे पात्रतां वहन्तीनां मातृकाणां संरक्षणं तद्गतविषयपरिशीलनं, तेषां आधुनिकविज्ञानसहायेन प्रकाशनादिकं च कर्तव्यम्। तद्वारा तेषां पूर्वाचार्याणां परिश्रमः सार्थको भवति इति उक्त्वा विरम्यते।

**सन्दर्भग्रन्थसूची –**


1. योगिनीतन्त्र, प्रकाशकः: Chowkhamba Sanskrit Series Office, स्थानम्: वाराणसी, वर्षः- 1960
2. अभिज्ञानशाकुन्तलम् – कालिदास, सम्पा०: एम्. आर्. काले (M. R. Kale) प्रकाशकः: Motilal Banarsidass, स्थानम्- दिल्ली, संस्करणम्- 1969
3. An Introduction to Textual Criticism – E. J. Kenney एवं E. J. Cowan प्रकाशकः: Cambridge University Press स्थानम्: Cambridge (U.K.), वर्षः- 1990